International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 257-259
© 2026 IJMH
www.themultijournal.com
Received: 11-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**सङ्गीता मण्डलः**
शोधच्छात्रा, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सङ्गीता मण्डलः**
शोधच्छात्रा, शिक्षाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्ञानप्रणाल्यां वेदेषु राष्ट्रियभावना

**सङ्गीता मण्डलः**

**सारांशः**
राष्ट्रैक्यस्य राष्ट्राखण्डतायाश्च संरक्षणं सम्बर्धनं च प्राचीनभारतीयसंस्कृतेः सनातनः सार्वकालिकश्च सन्देशः वर्तते। राष्ट्रियैकता मुख्यतः एका भावात्मिकशक्तिः वर्तते। वस्तुतः इयम् एकता एका सामुदायिकी भावना भवति। या च भावना देशस्य नागरिकाणां मनसि विकसिता भवति। वैदिकवाङ्मये राष्ट्रैक्यस्य राष्ट्राखण्डतायाश्च स्थापनायै अनेके महत्त्वपूर्णाः सिद्धान्ताः उपदिष्टाः सन्ति। भारतीयैः पाश्चात्यैश्च विद्वद्भिः तस्य प्रामाण्यं, प्राचीनता, सार्वभौमिकमहत्त्वं च समभावेन स्वीकृतानि सन्ति। वेदस्य प्रत्येकस्मिन् स्थाने राष्ट्रियभावना दरीदृश्यते। वस्तुत राष्ट्रियैकता एव राष्ट्रस्य आत्मा भवति। यथा - ऋग्वेदे धर्मस्य विस्तृतं निरूपणं कृत्वा परस्परप्रेम राष्ट्रियैक्यस्य मूलाधारत्वेन प्रतिपादितम्।

**कूटः- राष्ट्रम्, राष्ट्रियभावना, ऋग्वेदे राष्ट्रियभावना, यजुर्वेदे राष्ट्रियभावना, सामवेदे राष्ट्रियभावना, अथर्ववेदे राष्ट्रियभावना।**

वैदिकवाङ्मयं तस्याः संस्कृतेः प्रमुखतमं प्रतिनिधित्वं वहति। समग्रं वैदिकवाङ्मयं राष्ट्रैक्यस्य विश्वबन्धुत्वस्य च उदात्तभावनया सम्यगनुप्राणितं वर्तते। तस्यैव प्रभावेण अखिलभारतीय-चिन्तनपरम्परा समन्वयप्रधानत्वं प्राप्तवती। अनेनैव कारणेन भारतवर्षे राष्ट्रैक्यस्य, सामाजिक-समरसतायाः, धार्मिकसहिष्णुतायाः तथा सर्वधर्मसमभावस्य भावना दृढमूलत्वेन प्रतिष्ठिता अभवत्।

भारतवर्षं बहुजातीयं, बहुधार्मिकं, बहुभाषिकं, बहुसांस्कृतिकं च राष्ट्रं वर्तते। अत्र नानाविधानि वेशभूषणानि, आचाराः, व्यवहाराः, परम्पराश्च दृश्यन्ते। तथापि एतादृशीषु विविधतासु विद्यमानासु अपि राष्ट्रस्य अखण्डता तथा एकात्मभावः यथावत् संरक्षितः अस्ति। एतत् वैदिकसंस्कृतेः मूलमूल्यानां प्रभावस्य प्रत्यक्षं फलमिति निःसंशयं वक्तुं शक्यते।

इतिहासोऽपि अस्य विषयस्य साक्षी वर्तते यत् यदा मानवजातिः—

**"सर्वे भवन्तु सुखिनः। सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु। मा कश्चिद् दुःखभाग् भवेत्॥"**

इति सार्वभौमिकमङ्गलभावनां स्वजीवने साकाररूपेण अवलम्बितवती, तदा सा अधिकं सुखिनी, सुरक्षिताऽभवत्, चिरस्थायिनी च समृद्धिं प्राप्तवती। अद्यत्वे विविधसामाजिकराजनीतिकार्थिक-समस्याभिः परिव्याप्तायां विषमपरिस्थितौ भारतीयसमाजे राष्ट्रैक्यस्य राष्ट्राखण्डतायाश्च संरक्षणमेव परमावश्यकं कर्तव्यम् अवभासते। अस्माकं राष्ट्रं सम्प्रति नानाविधानां गम्भीराणां आह्वणानां सम्मुखं तिष्ठति। यदि तासां समुचितः सार्थकश्च परिहारः शीघ्रं न विधास्यते, तर्हि भारतीयसमाजस्य विघटनं निवारयितुं महती कठिनता भविष्यति।

वैदिकवाङ्मयं विश्वविख्यातं विश्वमान्यं च वर्तते। राष्ट्रैक्यं राष्ट्राखण्डता च कस्यापि राष्ट्रस्य सर्वतोमुखविकासस्य मूलाधारौ स्तः। एतयोः अभावे राष्ट्रस्य राजनीतिकं, सामाजिकम्, आर्थिकं, सांस्कृतिकं च उन्नयनं कदापि सम्भवं न भवति। वेदाः समादेशं कुर्वन्ति यत् सर्वेषां जनानां लक्ष्यं समानं भवेत्, चिन्तनं समानं भवेत्, हृदयानि समानभावनायुक्तानि स्युः, कर्माणि च राष्ट्रहितपरायणानि भवन्तु। सर्वे मिलित्वा राष्ट्रस्य अभ्युदयाय समन्वितप्रयत्नान् कुर्वन्तु। यथोक्तम्—

**"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥"**[1]

निःसन्देहं परस्परसहकारेण एव राष्ट्रस्याभ्युदयः लोककल्याणं च सम्भवतः। परस्परद्वेषः, ईर्ष्या, कलहः, वैमनस्यं च राष्ट्रस्य विघटनस्य प्रधानानि कारणानि भवन्ति। अतः वेदाः अस्मान् शिक्षयन्ति यत् भ्रातरः परस्परं द्वेषं न कुर्वन्तु, अपितु सर्वे समभावेन राष्ट्रहिताय राष्ट्रकार्येषु सम्यगनुष्ठानं कुर्वन्तु।

**"मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा। सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥[2]"**

ऋग्वेदे धर्मस्य विस्तृतं निरूपणं कृत्वा परस्परप्रेम राष्ट्रियैक्यस्य मूलाधारत्वेन प्रतिपादितम्। एतदेव मानवधर्मस्य मूलस्वरूपम्।
यथा—

**" विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम्। [3]"**

वयं मर्यादासम्पन्नाः, उदारहृदयाः, प्रसन्नचित्ताश्च भवेम; यतः मनसः प्रसादेन सर्वा आपदः प्रशमं यान्ति।
ऋग्वेदे अन्यत्रापि उक्तम्—

**"इन्दुस्तद्धो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः। [4]"**

प्रत्येकः मानवः सर्वतः सर्वदा च अन्यस्य मानवस्य रक्षणं कुर्यात्। एष एव मानवधर्मस्य मूलमन्त्रः।

धर्मस्य संरक्षणे स्वस्यैव संरक्षणं निहितम्, धर्मविनाशे तु स्वस्यैव विनाशः अवश्यम्भावी। यथोक्तम्—

**"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।"[5]**

वैदिकवाङ्मये 'विश्वधर्मात्' आरभ्य 'व्यक्तिधर्म' पर्यन्तं समष्टेः व्यष्टेश्च सर्वेषां धर्माणां सम्यग्विवेचनं दृश्यते। निम्नलिखितो वैदिकमन्त्रः राष्ट्रधर्मस्य सर्वाङ्गसुन्दरं स्वरूपं निरूपयति—

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां.....[6]**

अयं मन्त्रः राष्ट्रे विद्वद्भिः ब्राह्मणैः, पराक्रमसम्पन्नैः क्षत्रियैः, धर्मनिष्ठैः नागरिकैः च समलङ्कृतस्य आदर्शराष्ट्रस्य परिकल्पनां करोति।

### ❖ राष्ट्रम्

राष्ट्र इति पदं राजृ-दीप्तौ इत्यस्मात् धातोः ष्ट्रन् प्रत्यये निष्पन्नम् इति अत्र तावत् राष्ट्रपदं नपुंसकलिङ्गे एव प्रयुक्तं तस्यार्थः जनपदः चेति। डॉ. श्री. एम् . मोनियर्विलियम् महोदयद्वारा संगृहीते इंग्लिष्-संस्कृतम् डिक्शनरी नामके ग्रन्थे Nation शब्दस्य अर्थः संस्कृतभाषायां- जातिः, लोकः, जनपदः, प्रजा, वर्णः, जनता, देशः, विषयः, राष्ट्रम्, देशजनः, देशलोकः, देशवासिनः, राष्ट्रवासिनः, तथा विशेषदेशजनता इति उल्लिखितमस्ति।

### ❖ राष्ट्रियभावना

अस्माकं राष्ट्रस्य सङ्घटनं नाम भूमिः, जनसमूहः, संस्कृतिः, सभ्यता, इतिहासः, धर्मः, साहित्यम्, कला, राजनीतिः, जीवनदर्शनम् चेत्यादीनि। देशे सङ्घटनं जनानां मनसि गरिमा महिमाच नैसर्गिकरुपेण स्वाभिमानत्वेन वर्तते। इत्यतः अस्माभिः सङ्घटनम्एव राष्ट्रियभावना इति संज्ञा दीयते। राष्ट्रियभावना स्वस्य रक्षां कर्तुं शिक्षयति, न तु अन्येषाम् उपरी आक्रमणं कर्तुम्। राष्ट्रियभावना स्वाभिमानं भवति, न तु अभिमानम्। राष्ट्रियभावना तत्र न तु अन्यस्य राष्ट्रस्य अपमानं करोति। न तु स्वस्य अपमानं सहते। अतः एतादृशप्रकारस्य शुद्धा राष्ट्रियभावना अन्ताराष्ट्रिय-भावनायाः अपि पृष्ठभूमिं प्रस्तौति। अतः राष्ट्रियभावना अस्माकं भारतवर्षे अभिव्याप्ता। इत्यतः राष्ट्रियभावना सदृशी भावना एव शुद्धा राष्ट्रियभावना वर्तते।

### ❖ ऋग्वेदे राष्ट्रियभावना

वेदेषु त्रिकालाबाधितानां सत्यसिद्धान्तानां समाहारः विद्यते। सृष्टेः आदिकाले एव मानवैः सुव्यवस्थितस्य सामाजिकजीवनस्य आवश्यकता अनुभूता। जनसंख्यायाः वर्धनेन सह समाजस्यापि विस्तारः अभवत्। अनन्तरं मानवस्वभावस्य वैचित्र्येण संस्कारभेदेन च जनाः पृथक्पृथक् समुदायेषु निवासं कर्तुम् आरब्धवन्तः। तस्मादेव क्रमशः विविधराष्ट्राणां निर्माणप्रक्रिया प्रवृत्ता। तथापि वेदाः सर्वेषां मानवानां मध्ये मैत्री, सौहार्दं, सहकारः, धर्मपालनं, समन्वयश्च इति गुणान् राष्ट्रस्य स्थैर्यसमृद्ध्योः मूलकारणत्वेन प्रतिपादयन्ति। अतः वैदिकदृष्ट्या राष्ट्रियता न केवलं भौगोलिकसीमायाः परिमिता भावना, अपितु धर्माधिष्ठिता, सांस्कृतिकैक्यसमन्विता, लोकमङ्गल-परायणा च जीवनदृष्टिरिति सिद्ध्यति।

प्रत्येकस्य राष्ट्रस्य कृते एतदत्यावश्यकं यत् तत्र निवसतां नागरिकानां हृदयेषु राष्ट्रभक्तेः भावना सम्यक् सञ्चारिता भवेत्। ये जनाः स्वमातृभूमिं जन्मदात्रीमातरं इव मन्यन्ते, ते एव राष्ट्रस्य यथार्थभक्ताः राष्ट्रभक्ताश्च कथ्यन्ते। वैदिकवाङ्मये उत्तमं स्वराज्यं सूर्यसदृशं तेजस्वि, दृढं, चिरस्थायि च निरूपितम्।

**"यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् ।**
**न देवो नाध्रिगुर्जनः ॥[7] "**

अनेन मन्त्रेण स्वराज्यं सर्वोत्कृष्टा राज्यव्यवस्था इति प्रतिपाद्यते। आदर्शरूपेण सञ्चालिते स्वराज्ये तस्य सत्तायाः कदापि विनाशभयं न भवति। यानि राष्ट्राणि धर्मेण, न्यायेन, आदर्शशासनेन च सञ्चाल्यन्ते, तानि युगानुयुगं सूर्यवत् स्थिराणि स्वकीयमस्तित्वं धारयन्ति।

**"अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियम्।**
**न मिनन्ति स्वराज्यम्॥ [8]"**

राष्ट्रे जाति-धर्म-वर्णादिभेदेन कस्यापि प्रति पक्षपातः, द्वेषः, ईर्ष्या वा न कर्तव्या। यथा सूर्यश्चन्द्रमसौ च निरन्तरं लोकहिताय प्रवर्तेते, तथैव राष्ट्राध्यक्षः सम्राट् वा सर्वदा प्रजानां कल्याणमेव चिन्तयेत्।

**"इन्द्रावरुणयोरहं सम्राजोरव आ वृणे। ता नो मृळात ईदृशे॥ [9]"**

ऋग्वेदे अनेकेषु स्थलेषु अखण्डसाम्राज्यस्य भावना प्रतिपादिता दृश्यते। एषा भावना अद्यतनकाले राष्ट्रियैक्यस्य अखण्डतायाश्च प्रतीकरूपेण ग्राह्या। सार्वभौमस्य अखण्डराष्ट्रस्य संस्थापनं तदैव सम्भवति, यदा राष्ट्रवासिनां मध्ये परस्परप्रेम, सौहार्दं, भ्रातृत्वभावना च सम्यग्विकसन्ति।

### ❖ यजुर्वेदे राष्ट्रियभावना

यजुर्वेदे राष्ट्रस्य महत्त्वं विशेषरूपेण प्रतिपादितम्। राष्ट्रस्य सत्ता प्राचीनकालादेव पृथिव्यां विद्यमाना आसीत्। वैदिकसाहित्ये राष्ट्रसम्बद्धानि न केवलं प्रमाणानि, अपितु तस्य विस्तृतं स्वरूपवर्णनमपि उपलब्धम्।

**" ताऽअस्मभ्यं मधुमतीर्भवन्तु वयꣳ**
**राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥[10]"**

अस्य मन्त्रोऽयं भावः—वयं सर्वे राष्ट्रस्य एकतायाः, अखण्डतायाश्च रक्षणे निरन्तरं जागरूकाः भवेम। प्राचीनकाले प्रत्येकः नागरिकः

स्वकीयस्य राष्ट्रस्य प्रति स्वकर्तव्यं सम्यगवगच्छति स्म। राष्ट्ररक्षणस्य दायित्वं न केवलं राज्ञः, अपितु समग्रप्रजायाः अपि आसीत्।

**"मा त्वद्राष्ट्रमधिभ्रशत्।"**

राष्ट्रियतायाः दृढतमं सूत्रं परस्परप्रेम, सद्भावना, सहयोगश्च। यत्र जनानां मध्ये ऐक्यमस्ति, तत्र राष्ट्रमपि दृढं, समृद्धं, अखण्डं च भवति।

### ❖ सामवेदे राष्ट्रियभावना

सामवेदेऽपि राष्ट्रस्य एकतायाः, अखण्डतायाश्च आधारभूततत्त्वानि स्पष्टतया प्रतिपादितानि सन्ति।

**" आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् ।**
**क उग्राः के ह शृण्विरे ॥11"**

यः सत्यः राष्ट्रभक्तः भवति, स राष्ट्रद्रोहिणः कदापि न सहते; यतः ते राष्ट्रस्य स्थैर्याय राष्ट्रियभावनायै च घातकाः भवन्ति। एषा राष्ट्रनिष्ठा राष्ट्रस्य दृढतां समृद्धिं च वर्धयति।

**"आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः । दृढा चिद्यमयिष्णवः॥12"**

अस्य मन्त्रोऽपि राष्ट्रस्य ऐक्यं, संगठनं, परस्परसहयोगं च प्रतिपादयति। प्रत्येकस्य नागरिकस्य कर्तव्यं भवति यत् स राष्ट्रस्य अखण्डतायै विघ्नकारिणः शत्रून् पराजयेत् तथा राष्ट्रविघातकतत्त्वानां समूलोच्छेदं कुर्यात्।

**"इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् । शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम्॥13"**

### ❖ अथर्ववेदे राष्ट्रियभावना

अथर्ववेदे मातृभूमेः प्रति भक्तेः उदात्ततमः आदर्शः प्रतिपादितः—

**"तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः पर्जन्यः पिता स उ नः पिपर्तु ॥14"**

एषा भूमिः मम माता अस्ति, अहं तस्याः पुत्रः अस्मि। एषा भावना राष्ट्रप्रेमस्य मूलाधारः। यदा सर्वे नागरिकाः स्वभूमिं मातृरूपेण पश्यन्ति, तदा ते तस्याः रक्षणाय, अखण्डतायै, समृद्धये च सर्वदा समुत्सुकाः भवन्ति।

राष्ट्रस्य महत्त्वं कदापि न निराकर्तुं शक्यते। सर्वे मिलित्वा सौहार्देन जीवनं यापयेयुः—इति सन्देशः सर्वेषु युगेषु प्रतिध्वनितः। परस्परप्रेम एव समाजस्य, राष्ट्रस्य, विश्वस्य च स्थैर्यस्य मूलाधारः। एषैव भावना राष्ट्रियतां दृढयति।

**"तेजस्विनावधीतमस्तु मा विद्विषावहै।"**

**"सविता राष्ट्राणि राष्ट्रपतिं राष्ट्रमस्मिन् दधातु।"**

अनेन ज्ञायते यत् वैदिककालेऽपि राष्ट्राय परमादरः प्रदत्तः। सर्वत्र राष्ट्रस्य अभ्युदयः, सुरक्षा, समृद्धिश्च प्रार्थिता। राष्ट्रस्य अस्तित्वेन एव व्यक्तेः अस्तित्वं सुरक्षितं भवति।

अतः वैचारिकैक्येन एव राष्ट्रियैक्यस्य अखण्डतायाश्च स्थापना सम्भवति। यथोक्तम्—

**"समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्॥"**

येषां जनानां विचाराः, संकल्पाः, मनांसि, चित्तानि च समानानि भवन्ति, तेषां राष्ट्रं नित्यमेकं, सुदृढम्, अखण्डं च भवति।

### ❖ निष्कर्षः

ऋषिभिः नः वेदेषु मानवजीवनस्य विषये विविधाः मीमांसाः प्रस्तुताः। अमीषां दृष्टिः मानवस्य केवलं सामाजिकस्य आर्थिकस्य सांस्कृतिकपक्षाण्येव मूल्याङ्कनं न करोति, अपि तु स्वदेशभक्तिः, स्वदेशप्रेम अथवा स्वराष्ट्रप्रेम इत्यादीनां भावानुत्पादयति। कुत इति चेदस्मद्ऋषीणां ज्ञानं सर्वमपि तथ्यं यत् स्वसामूहिकस्य सम्मानपूर्णसत्तास्थापनाय तदावश्यकत्त्वं वरीवर्ति। तद्यथा- स्वभूमेः स्वदेशस्य च मनसा-कर्मणा-धनेन-वाचा सुरक्षाकार्या।एवञ्च एतत्तदा सम्भविष्यति यदा स्वजन्मभूमिम्, स्वदेशञ्च प्रति एकैकोऽपि देशवासी निष्ठावान् भवेत्, तदुन्नत्यर्थं क्रियावान् भवेत् तथा तदादितत्त्वस्य सम्पादनाय सदैव संहतिरावश्यकी। तच्च सङ्घटनं क्रियावद्भवतु। अन्यथा अन्न-जलाभ्यां, धनधान्याभ्याञ्चरहिते समये देशोऽयमन्येन देशेन आङ्क्रमणग्रसितो भविष्यति। फलस्वरूपम् जनता-भावग्रस्ता भविष्यत्येवञ्च तदा तदीया दशागमिष्यति। यथा अमुष्य शिशोः माता या भवति, तस्या दुग्धमनेन शिशुना न लभ्यते, तदिदमन्नेन केनचिच्छिशुना स्वीकरिष्यते तद्दुग्धम्। ईदृशी दयनीयस्थितिर्भविष्यति। एतत्सर्वं विविच्य भारतीयैः ऋषिभिः जनानां मनसि राष्ट्रप्रेमादम्यभावना भवेदिति नैकवेदैः राष्ट्रियायाः दिव्यभावनाया पङ्क्तीः पापठ्यते। एवं रीत्या वेदेषु राष्ट्रियभावनाविषयाः निरूपिताः सन्ति।

### ❖ सहायकग्रन्थसूची


- शास्त्री, सत्यव्रतः. *वैदिकसंस्कृतिः.* भारतीयविद्याप्रकाशनम्, 1997.
- शास्त्री, श्रीपाददामोदरः. *वैदिकसाहित्यस्य इतिहासः.* मोतीलाल-बनारसीदास्, 2002.
- वेदालङ्कारः, जयदेवः, सम्पा. *ऋग्वेदसंहिता.* आर्यसाहित्यप्रचारट्रस्ट, 2003.
- वेदालङ्कारः, जयदेवः, सम्पा. *यजुर्वेदसंहिता.* आर्यसाहित्यप्रचारट्रस्ट, 2003.
- वेदालङ्कारः, जयदेवः, सम्पा. *सामवेदसंहिता.* आर्यसाहित्यप्रचारट्रस्ट, 2003.
- वेदालङ्कारः, जयदेवः, सम्पा. *अथर्ववेदसंहिता.* आर्यसाहित्यप्रचारट्रस्ट, 2004.
- Aurobindo, Sri. *The Secret of the Veda.* Sri Aurobindo Ashram, 1998.
- Dayananda Saraswati, Swami. *ऋग्वेदादिभाष्यभूमिका.* आर्षसाहित्यप्रचारट्रस्ट, 2006.

https://www.xn--j2b3a4c.com/en/index.php


### पाद टिप्पणी -

1. ऋग्वेदः १०.१९१.२
2. अथर्ववेदः ३.३०.३
3. ऋग्वेदः ६.५२.५
4. ऋग्वेदः ६.७५.१४
5. मनुस्मृतिः ८।१५
6. यजुर्वेदः २२.२२
7. ऋग्वेदः ८.९३.११
8. ऋग्वेदः ५.८२.२
9. ऋग्वेदः १.१७.१
10. यजुर्वेदः ९.२३
11. सामवेदः ३.१.३.३
12. सामवेदः ५.१.२.३
13. सामवेदः ५.१.३.२
14. अथर्ववेदः १२.१.१२